Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# टीकोपक्रमणिका।

यतः स्फुरन् दृष्टफलः स्वचित्ते,
येनोक्त आयुर्निगमः प्रमाणम्।
तमादिमाप्तं पुरुषप्रधानं,
सेवामहेऽव्यक्तमहेतु तत्त्व॥ १॥
वक्त्रादृष्टफलस्य यस्य परमेशेनोदितत्वादिह,
प्रामाण्यं निगमेषु सिद्ध्यतिकिलादृष्टार्थसामादिषु
सत्यं शाश्वतमुत्तमोत्तमतमं शास्त्रेषु सर्व्वेषुवा,
आयुर्व्वेदमुपास्महे वयमिमं तं सर्व्वविद्याकरम्॥ २॥
एकैकमेकैक मुनिर्यदीयं
मतं समाश्रित्यचकार शास्त्रम्।
जयत्यसौसोऽखिलशास्त्रविद्या,
कल्पद्रुमः सर्व्वफलोदयत्वात्॥ ३॥
व्याख्यायतेऽतिविशदं मयाचरकसंहिता।
यत्नेन कविरत्नेन श्रीमद्गङ्गाधरेणतु॥ ४॥

अथ खलु सुकृतदुरितनिदानकसुखदुःखमोक्षनिदाननिखिलफलमुख्यचरमपरमानन्दमयमोक्षमुख्यप्रयोजनसाधनधर्म्मोत्पादनराजसतामसमानससकलमलविशोधनविधिविहितकर्म्माचरणमूलयथाभोष्टधनगणसाधनकामनासिद्धौ परमसाधनसेव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽभिगम्येत्यादि । आशीः शुभचिन्तासूचन-वाक्यं जयेतिरूपं वाक्यमाह ।

व्याधय इत्यादि । सर्व्वप्राणीति स्थावरजङ्ग-मानां सर्व्वप्राणभृतां ह्रियमाणात्तस्मात् । इति भर-द्वाजवचनं श्रुत्वा शक्रः किं चकार तदाह ।

तस्मै प्रोवाच भगवानायुर्व्वेदं शतक्रतुः ।
पदैरल्पैर्मतिं बुद्ध्वा विपुलां परमर्षये ॥
हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् ।
त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः ॥

तस्मायित्यादि । शतक्रतुः शक्रः पदैरल्पैरिति अल्पाक्षरमयवाक्यप्रयोगेन विपुलां भरद्वाजस्य मतिं बुद्ध्वा तस्मै भरद्वाजाय परमर्षये प्रोवाच अध्यापनव्यापारेण ददौ कीदृशरूपमायुर्व्वेदं प्रोवाचेत्यत आह ।

हे ह्रित्यादि । हेतुरिति हेतुः कारणं वीज-मित्यनर्थान्तरम् । सच द्विविध उपयोगिहेतुरुत्पा-दकश्च । तत्रोपयोगीहेतुः प्रयोजनीभूतयोर्धातु-साम्यरक्षणकरणयोर्व्विषये यस्योपयोगिता । सच

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महासुखदर्शनान्महायुषोपि स्वल्पसुखमहादुःखत्वादल्पायुष्ट्वमहायुष्ट्वयोर्न विनिगमना। तद्द्वयं चेत्समसुखदुःखोभयस्यैकतासम्भवादसम्भवः स्यात् विषमसुखदुःखोभयस्यैकत्वापत्तिश्च स्यात् न सुखात्मकं दुःखात्मकं वायुः स्यादिति। सुखदुःखान्यतरजनकं चेत् तदा सुखमात्र जनकं न तप

उपवासादि क्लेशकरत्वात्। दुःखमात्रजनकं नावैधकर्म्मादिभोजनादि सुखकरत्वात्। तदुभयजनकश्चेदेकत्वापत्ति र्नतु सुखलक्षणं दुःखलक्षणञ्चेति द्विविधं स्यात्। इति चेन्न शारीरमानसाभ्यां रोगाभ्यामनभिद्रुताभिभूतादीनां पुरुषाणामायुषः सुखदुःखगुणयोर्जनकत्वेन सुखदुःखसंज्ञकत्वात् तथा च येनायुषा विशिष्टस्यादृष्टप्रयुज्य सुखदुःखनिवृत्तिलक्षणमोक्ष स्तपोजपशमदमादिभिर्जनिततत्त्वज्ञानादुपजायते तदायुस्तस्य शारीरमानसव्याध्यनभिद्रुतादेश्चायुरैहिक सुखजनकत्वात् सुखमेवेष्यते। व्याध्यभिद्रुतादेर्लोकद्वय दुःखजनकत्वात् दुःखमायुरिष्यात्। एवमायुषो हितत्वाहितत्वयोर्जनकत्वाद्धिताहितसंज्ञा बोध्या। तस्य चतुर्व्विधायुषो हिताहितं स्वस्यचतुष्कादौ वच्यते। मानञ्चेन्द्रियस्थाने तत्प्रमानेनाप्यमानं लक्ष्यं स्वलक्षण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वत ऊर्द्धमेव वच्यते शरीरेत्यादिना। ननु शरीरेन्द्रियसत्वात्मसंयोग आयुर्व्विच्यते। तस्य संयोगस्य गुणस्य किं परिमाणं कथं वा गुणोवर्त्तते गुणे इति। उच्यते। संयोगः खलु संयोगिदेशमाननितत्व्यापी तावदेव संयोगस्यमानं कालतो देशतस्त्वद्विधामानं शरीरेन्द्रियसत्त्वात्मसंयोगस्य यत् शरीरादि संयोगिदेशनियतं तद्दैशिकं तस्य दीर्घवादिकं नास्तिकालनिबन्धनञ्च यन्मानं तत्कालिकं कालस्य दैर्घाणुत्वादिना तन्मानस्य दीर्घत्वादिकं व्यपदिश्यते। नित्यगस्य तु कालस्य परिवृत्त्या सङ्ख्यातिरेकाल्पत्वादिना दीर्घत्वह्रस्वत्वादिकं व्यपदिश्यते।

तच्च हिताहिताभ्यां दार्ढ्यशैथिल्यादौ जाते सति भवति परिमाणादिगुणा गुणादिषु सर्व्वत्रैववर्त्तन्ते यथा षड्‌षा इत्यादि।

अमानञ्च खलु वत्सरार्द्धसङ्ख्यातिक्रमेण कालवैशिष्टानियमादायुषोव्यवहरन्ति लोके ततस्तद्मानमित्यायुषोमानामानयोर्व्यवस्थायां यो यदामरिष्यति तन्मानम्। यो मरिष्यतीतिमात्रं वच्यते तत्तस्यामानमिति मानामानमायुषो हिताहित सुखदुःखात्मकं चतुर्व्विधमायुः खलच्चणतस्त्वायुस्तस्यायुषश्च हिताहितं भेषजाहार विहारा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**शरीरेन्द्रियसत्वात्मसंयोगोधारि जीवितम्।**
**नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते॥**

दिकमभिधेयमाप्तैरित्यायुर्व्वेदेन सहायुस्तद्धिता-
हित मानामानोपदेशवाक्यानामाधाराधेयता सम्बन्ध
उक्तो यत्रेति पदेन। हिताहितादिपदं तदुप-
देशवाक्यपरमर्थाभिधायकं हि वाक्यं न तु तद-
र्थोवस्तु वर्त्तते ग्रन्थे। तत्रादौ लक्षणतस्त्वायुराह
शरीरेत्यादि। शरीरमिह चेष्टेन्द्रियार्थाश्रयः। इन्द्रि-
यस्य पृथगुपादानान्न च चेतनाधिष्ठानभूतं पञ्च-
महाभूतविकारसमुदायात्मकं तेनहीन्द्रियलाभे
पुनरुक्तत्वापत्तिः स्यादस्तु वा वाह्येन्द्रियादि पञ्च-
महाभूतविकारःसमुदायात्मकं शरीरम्। इन्द्रिय-
न्त्वाभ्यान्तरं नित्यं श्रोत्रादिकं तेन नेन्द्रियस्य पौन-
रुक्तं वृक्षादेरपि वाह्येन्द्रियरहितस्यायुष्मत्त्वमाभ्या-
न्तरेन्द्रियवत्वात् : सत्वं मनः आत्माचेतना धातु
स्तेषां संयोगः शरीरेन्द्रियसत्त्वात्मसंयोग इति स्वरू-
पलक्षणमायुषः स्वरूपमुक्ता धर्म्मान्तरोपदेशेन
लक्षणं वक्तुं पर्य्यायानाह धारीत्यादि। सत्वात्म
शरीरेन्द्रियाणि परस्परं धारयितुं शीलं यस्य तत्
धारि जीवनं जीवितं फलात्मकं जीवधात्वर्थः नित्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परे तु शरीरेन्द्रियेत्याद्युपलक्षणं तेन समवायिसंयोग आयुरिति ज्ञापनार्थं शरीरेन्द्रियादिप्रदर्शनमिति भाषन्ते। तत् समवायिसंयोगो हि मृतपुरुषदेहे घटादीनामपि स्यादिति। अन्ये तु स्वारम्भकतत्संयोगो ऽदृष्टप्रयुज्यः समवायिसमूहसंयोगो वा यावत्समवायिसंयोगो वा आयुरुच्यते घटादीनां स्वारम्भकपञ्चभूतरूप पञ्चतत्वसंयोगश्चेदायुर्दृक्षादीनामपि चेतनपुरुषवत् तत्त्वचतुर्विंशतिरारम्भिकैव तेजोवनीपवनवारिसनाथवीजस्य तदारम्भकस्य तदारम्भकाले जीवात्मनस्तत्रवायुना प्रेरितस्य प्रवेशेन तत् प्रयुज्यत्वात्।

तेन मृत्युना च तेषामायुष्मत्त्वं लक्ष्यते। घटादिस्थावराणां कपालाद्यात्मक समवायि समूहसंयोगो नादृष्टप्रयुज्यः कर्मजातगुणविशेषो ह्यात्मनोऽदृष्टमिति दृक्षादीनां सजीवानामस्तिचादृष्टमस्ति चायुरितिब्बोध्यम्। यावत् समवायि संयोगस्तु अजीवाचेतनानां घटादीनां सजीवाचेतनानां दृक्षादीनां चेतनानाञ्चास्त्येव। दृक्षत्वनरत्वादिरूपेण यथास्वतत्वपरिणामे स्वस्वयावत् तत्वान्येव समवायीनिकारणानि अदृष्टमिह समवायिकारणं देहिसमवायित्वेन निमित्तञ्च। यावत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जपूरकम्। तथा जलदनादश्रवणाच्च फलति लवनी। फलाढ्यता च चूतानां भवति मत्स्यवसाभिषेकेण। तच्चैव मनेनानुमीयते। तथा भवति सुखमशोकस्य कामिणीचरणतलाभिहननेन तेन चास्य स्पर्शनमनुमीयते। तथा अभिवादितस्तु यो विप्रो नाशिषं सम्प्रयच्छति। श्मशानेजायते वृक्षो गृध्रकङ्कोपसेवितः। तथा वृक्षगुल्मं बहुविधं तत्रैव तृणजातयः। तमसाधर्म्मरूपेण श्छन्दिताः कर्म्महेतुना। अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः। एतदन्तास्तु गतयो ब्रह्माद्यैः समुदाहृता इत्यादिवचनात् तस्मात् श्रवणस्पर्शननयनरसनघ्राणानीति पञ्चबुद्धीन्द्रियाणि द्विविधानि नित्यानि निरावरणसावरणानि।

तत्राभ्यन्तराणि सावरणानि तेषां शरीरारम्भे भौतिकभावे वाह्याधिष्ठानश्रोत्राद्यभावात्। वाह्याधिष्ठानसंश्रये वाह्यानि च निरावरणानि न च तेभ्यः पृथगिन्द्रियाणि भवन्ति तस्माच्चेतनमपि द्विविध मन्तश्चेतनं वाह्याभ्यन्तरचेतनञ्च। यद्यपि ज्ञत्वादात्मैव चेतनो न तु सत्त्वं शरीरं वा इन्द्रियं वा यदुक्तं चेतनावान् यतश्चात्मा ततः कर्त्तानिरुच्यते इति। तथापि,आत्मा ज्ञः करणैर्योगाज्ज्ञानं तस्य प्रवर्त्तते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्योगादभावाद्वा करणानां निवर्त्तते इति। एवं निर्व्विकारः परस्त्वात्मेत्यादिवचनाच्छरीरेन्द्रिययोरचैतन्यमुक्तम्। तत्र सत्यपि इच्छादीनामन्तश्चैतन्ये वहिश्चैतन्याभावेनाचेतनत्वव्यवहारः वहिश्चैतन्यं हि सुकृतदुरितसाधनवैधावैधकर्म्मसाधनत्वेन प्रधानम्। तच्च वहिरिन्द्रियाण्यन्तरेण न सम्भवति। एवं निरिन्द्रियत्वमपि द्विविध माभ्यन्तरेन्द्रिय रहितत्वं वाह्येन्द्रियरहितत्वञ्च तद्वत्त्वादचेतनमपि द्विविधम् वाह्याचेतनमन्तश्चेतनं इच्छादि। वाह्याभ्यन्तराचेतनं घटादि। इत्यञ्च जरायुजानां मनुष्यादीनामण्डजानां सर्पादीनां स्वेदजानां मशकादीनामुद्भिज्जानां मण्डूकइण्डुभादीनां चतुर्थां प्राणिनामुभयतश्चैतन्यं उद्भिज्जानां वानस्पत्यादीनामन्तश्चेतनत्वं वाह्याचेतनत्वञ्च। घटादीनां वाह्याभ्यन्तराचेतनत्वमिति बोध्यम्।

एतेन देवादीनां ब्रह्मादीनां प्राणिनामारम्भकाणि नवद्रव्याणि खादीनि घटादीनामात्ममनोवर्ज्जितानि सप्त खादीनि। तैः समवेतत्वेन विशिष्टापूर्व्वमूर्त्तिमत्त्वात् खादिगुणकर्म्मातिरिक्तगुणकर्म्मवत्त्वाच्च खादिभ्यो विशेषस्याविशेषस्य तदात्मकत्वात् तद्गुणकर्म्मवत्त्वाच्च।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पृथिव्यापश्च सौम्या इत्यभिप्रेत्य स्वयमुक्ताच्च सोमगुणातिरेकान्मधुरो रस इत्यस्मात् सौम्यमधुररसवद्द्रव्यं सर्वं सौम्यञ्च कफं वर्द्धयति सयोनित्वात्। मधु पुनर्नाशयति स्वप्रभाववतात्। तथा पृथिव्यग्नि भूयिष्ठत्वादम्लस्तद्रसञ्च द्रव्यं सर्वं पित्तमाग्नेयं वर्द्धयति सयोनित्वात्। दाडिमामलकेत्वम्ले द्रव्ये नाशयतः स्वप्रभावात्। एवं तोयाग्निभूयिष्ठत्वाल्लवणो रसस्तद्रसञ्च द्रव्यन्तु सर्व्वमाग्नेयं पित्तं वर्द्धयति सयोनित्वात् सैन्धवन्तु नाशयति प्रभावात्। वाय्वग्निभूयिष्ठत्वात् कटुको रस स्तद्रसञ्च द्रव्यं सर्व्वमाग्नेयं पित्तं वर्द्धयति सयोनित्वात् पिप्पलीशुण्ठ्यौ नाशयतः प्रभावात्। वाय्वाकाशातिरेकात्तिक्तोरसस्तद्रसञ्च द्रव्यं सर्वं वातं वर्द्धयति सयोनित्वात् न तु वेत्राग्रपटोलपत्रे स्वप्रभावात्। पवनपृथिव्यतिरेकात्कषायस्तद्रसञ्च द्रव्यं सर्वं वायव्यत्वात् वातं वर्द्धयति पार्थिवत्वात् तु स्तम्भयति फलत्रयन्तु नाशयति त्रिदोषं विरेचयतिमलं स्वप्रभावात्। एवं चित्रकतुल्या दन्ती स्वप्रभावात् विरेचयति। विषं विषं हन्ति मणिविशेषश्च विविधञ्च कर्म्मकरोति स्वप्रभावात्। इति खादिभ्यो विशिष्टापरापूर्व्वमूर्त्तिगुण कर्म्मशालित्वेन खाद्यारब्धमभिन्नमपि भिन्नमिति बोध्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सार्थागुर्व्वादयोबुद्धिः प्रयत्नान्ताः परादयः ।**
**गुणाः प्रोक्ताः प्रयत्नादि कर्म्मचेष्टितमुच्यते॥**

पटः शुक्ल एव हरिद्राचूर्णसंयोगेन हरिद्रायाश्चूर्णस्य तैक्ष्ण्येन विरोधिना मान्द्यगुणनाशाच्छुक्लकृष्णाभावाद्रक्तोऽभिव्यज्यते रक्तशुक्लकृष्णवर्णा हरिद्रा । एतेन यदुच्यते मणिमन्त्रादीनां विषहरणादि कर्म्म यत् तत् तु शक्तिर्नामाष्टमं वक्ष्यति तन्निरस्तम् ।

इत्यञ्च सत्त्वात्मशरीरेति त्रयं मिलितं लोकः सेन्द्रियश्चेतनो निरिन्द्रियोऽचेतनश्चेति द्विविध स्तच्च खादिद्रव्यात्मकत्वाद्द्रव्यमेव न गुणः कर्म्म वा आश्रयत्वेन द्रव्यप्राधान्यात् । चेतनाधात्वधिष्ठितत्वात् पुंसांश्च दृक्षादेश्च अन्तश्चैतन्याच्चेतनत्वञ्चेति बोध्यमिति । ननु तत्र सर्व्वं प्रतिष्ठितमिति यदुक्तं तत्र सर्व्वमिति किं खादिनवकमात्रमारम्भकत्वेन प्रतिष्ठितमुतकिमन्यदित्यत आह ।

सार्था इत्यादि गुणाः प्रोक्ता इत्यन्तम् । गुणाः प्रोक्ता अर्थात् चेतनाचेतनसाधारणद्रव्याणाम् । तत्रार्थाः शब्दस्पर्शरूपरसगन्धा इति वक्ष्यति । तैः सहवर्त्तन्ते ये ते गुर्व्वादय इति सह शब्दोपादानेन शब्दादयो गुणा यथा पञ्चभूतानामाकाशादीनां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स च व्यापारः चणिकस्तत्र यस्तत्तत्प्रसिद्धाकृति सम्पादकतया समवायः स नित्य दृष्ट एवेति द्रव्याणां यथा स्वघटकद्रव्यगुणकर्म्माणि तथैवैषां समवाय श्चेति चतुर्द्धा सामान्यं चतुर्द्धाविशेषश्च तत्तद्द्रव्याणां समतया सूतानां मवादीनां घटकानां द्रव्यगुण- कर्मणां तेषां समवायस्य च समानप्रसवात्मकत्वेन ग्राह्यत्वात् । एतद्भवादितस्तद्भवादेर्भिन्नप्रसूतात्म- कत्वेन ग्राह्यत्वाच्च ।

द्रव्यञ्च घटेकार्य्यें नीलपीतादिगुणस्पन्दनादि- कर्मम्रदादिद्रव्याणां कारणानां सजातीयविजातीय- तन्मात्रवैलक्षण्यवता मनेकतावताञ्च समुदायात्मके मज्जलवालुकादीनां यो रूपरसादिगुणो यच्च कर्म तत्सर्व्वं परस्परं मज्जलादेः संयोगकाले मज्जलादे- र्गुणैर्गुणस्य कर्मणा कर्मणः कपालाद्यवयवानां परस्परसंयोगात् समुदायस्य तैर्गुणकर्मभिः सह योगोऽपृथग्भावः समवायः तत्र नीलादीनि रूपाणि एकद्वित्र्यादीनि यानि जायन्ते रसाश्चयेऽपरे परे वा यावन्तो नित्या वा तेषां रूपादीनां परापरत्वसङ्ख्या- दिभिः सहयोगश्च समवायः परत्वादौ संयोगवि- भागौ तु द्रव्यनियतत्वेन निर्देशान्न गुणकर्मवृत्ती- स्यात मित्यपि बोध्यम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यादौ अप्रसज्यसंयोगस्य विरोधीप्रसक्तोऽस्ति समवाय इति समवायोऽत्यन्ताभावः। रूपे संयोगेन रूपत्वं नास्तीत्यादौ अप्रसज्यस्य संयोगस्य विरोधीप्रसक्तोऽस्ति समवाय इत्यपि समवायोऽत्यन्ताभावः। पक्के घटे श्यामो नास्तीत्यादौ समवायेन प्रसक्तस्य श्यामस्याभावात् प्रसज्यस्य समवायस्य विरोधी असंयोगाख्यः पृथक्त्वं अत्यन्ताभावः। एवमाम घटे लौहित्यं नास्तीत्यादौ समवायेन प्रसज्यस्य लौहित्यस्य निषेधात् प्रसज्यस्य समवायस्य विरोधी असंयोगः पृथक्त्वम्। आकाशस्य पुष्पं नास्तीत्यादौ चैवमेव बोध्यः। पर्युदासनञा अभावबोधने प्रसज्यत्वं नापेक्ष्यते तत्समभिव्याहृतपदार्थेतरवस्तुद्योतकत्वात्। अत एव नञ्निपाता द्विविधः प्रसज्यप्रतिषेधार्थकः पर्य्युदासार्थकश्च। प्रतियोगिनः प्रसक्तिं कृत्वा यत्प्रतिषिध्यते स प्रसज्यप्रतिषेधः। परितः सर्व्वतः प्रसिद्ध्याप्रसिद्धिभ्यामुदास्यते यत्प्रतिषिध्यते सः पर्युदासः। क्रियायोगे प्रसज्यप्रतिषेधार्थो नञ् अन्यथा ग्रामं न गच्छतीत्यादौ ग्रामादेः कर्म्मत्वादिकारकत्वानुपपत्तिः। नामयोगे धातुयोगे पुर्युदासो यथा अब्राह्मणः न रूपमाकाशे आकाशं न पश्यत्यन्ध इत्यादौ पर्युदासः। अभाव इत्यत्र च नञ् उभयार्थौ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्प्राकृतं स्वाभाविकं क्षुत्पिपासाजराजन्ममरणादि-वत् । समदर्शनशीलाधी र्मनोनियमहेतुत्वशीला इति र्यथार्थस्मर्त्तव्याश्रयरूपास्मृतिस्ताश्च बुद्धिसंज्ञा-स्तत् समयोगः कर्त्तव्याकर्त्तव्यहिताहितमित्येतद्रूपेण ज्ञानं धीसमयोगः । विषयप्रबलचित्तस्य विषये र्नियतो योगो धृतिसमयोगः । स्मर्त्तव्यस्य तत्त्वतो ज्ञानाय स्मर्त्तव्ये योगः स्मृतिसमयोग इति बुद्धि-समयोगः । तस्माद्वाङ्मनःशरीराणां सम्यक् प्रवृत्ति र्भवति। यद्वक्तव्यत्वेनोचितं तद्वदतीति वाक्समयोगः। यच्चिन्त्यत्वेनोचितं तच्चिन्तते मन इति मनःसमयोगः। यच्चेष्टितव्यतयोचितं तच्छरीरं चेष्टते इति शरीर-समयोगइति। एवं श्रोत्रं शक्त्यनुरूपमर्थं शब्दं यच्छृ-णोति स शब्दसमयोगः। स्पर्शनं तथाभूतं स्पर्शं यत्-स्पृशति स स्पर्शसमयोगः । चक्षुश्च यत्तथारूपं प-श्यति तद्रूपसमयोगः।रसनं यत्तादृशं रसमास्वदते स रससमयोगः।गन्धं च तादृशं घ्राणं जिघ्रति स घ्राण-समयोग इति मनोवाक्कायसम्भूतं सुखं तेभ्यो यो-गेभ्यो जायते । इति कतिधापुरुषीयेऽपि वक्ष्यते । वेदनानामसात्म्यानामित्येते हेतवः स्मृताः । सुख-हेतुर्मतस्त्वेकः समयोगः सुदुर्लभः । नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः । हेतुस्तु सुख-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्याह कश्चित्तन्न शरीरभिन्नत्वान्मनसो मनोभिन्नत्वाच्छरीरस्य निर्व्विकारत्वापत्तौ तदुभयस्मात् पर इत्युक्तितोऽपि सुषुप्तौ तथाविधत्वादात्मन आनन्दमात्रभोगित्वात्। अन्येतु मनःशरीराभ्यां हि यस्मात् तु भिन्नक्रमे। परः श्रेष्ठ आत्मा तस्मान्निर्व्विकारः। निर्व्विकारस्तु यस्मात् तस्मान्मनःशरीराभ्यां श्रेष्ठआत्मेति व्याचक्षते तन्न साध्यसमत्वादहेतुत्वात्। वस्तुतस्तु निरुक्तं धातुवैषम्यं दुःखञ्चेति इयं विकारः आत्मेत्यस्य परइति विशेषणान्न खल्वात्मा केवलश्चेतनाधातुर्यं पुनरस्मिन् पुरुषे नान्तःप्रज्ञं न वहिः प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमव्यपदेश्यमव्यवहार्य्यमचिन्त्यमलक्षणमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते एष आत्मा स विज्ञेयः सोऽव्यक्तः सोऽध्यक्षः सोऽक्षरः सोऽनादिः स विश्वं सोऽव्ययः स परमात्मा द्रष्टारमुपद्रष्टा भोक्तारमनुभोक्ता न द्रष्टा न भोक्ता तर्हि किं सः। अव्यक्तमात्माचेतज्ञ इत्यादि पर्य्यायेण शारीरे वक्ष्यमाणः समसत्त्वरजस्तमोऽनुप्रविष्टस्त्रिगुणलक्षणः पुरुष एतस्मिन् सत्त्वात्मशरीरात्मकराशिपुरुषे भवत्यात्मा। स यत्राधिष्ठाने यस्यामवस्थायां च सम्प्रतिष्ठितो द्रष्टा क्रियाणां भोक्ता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवति स्थूलभूतयोगात्तु वैश्वानरः। दुःखाभावात्तु सुतरामव्यक्ते प्रागुक्तेत्वात्मनि न व्याधि र्नित्यसुखत्वात्तु नित्यारोग्यं खलु वर्त्तते इति।

ननु गौतमोक्तं बुद्धीच्छाद्वेषसुखदुःखप्रयत्नानामात्मलिङ्गत्वमिव कतिधापुरुषीयेऽपि स्वयमपि इच्छाद्वेषः सुखं दुःखं प्रयत्नश्चेतनाधृतिः। बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मन इति वच्यते ते चेत् क्षेत्रज्ञआत्मनि न वर्त्तन्ते निरुपादाना: कथं प्रत्यगात्मनीच्छाद्वेषादयो गुणा निर्व्वर्त्तन्ते नित्यबुद्ध्यादिमत्त्वान्निर्गुणत्वं वा कथमात्मन इति नाशङ्क्यम्। क्षेत्रज्ञस्य चेतनादयोऽनभिव्यक्तास्तिष्ठन्त्यिष्टद्भूततेजोवन्नात्मका न सत्त्वादिगुणात्मका तस्मान्न लौकिक गुणाः समसत्त्वादियोगे त्वव्यक्तावस्थायां चैतन्यादयो ऽव्यक्ता महता योगे विद्याबुद्धिरहङ्कारयोगे चाविद्या बुद्धिर्व्यज्यते। राशिपुरुषभावे महदङ्काराभ्यां विद्या विद्याबुद्ध्यादयो जायन्त इति न निरुपादाना बुद्ध्यादयः। राशिपुरुषभावेन जायमानेऽस्मिन् जायन्ते ये क्रियागुणास्ते केवलेऽस्मिन्नवर्त्तन्त इति निष्क्रियो निर्गुणआत्मोच्यते। एवञ्चेन्महदहङ्काराभ्यां जायन्ते तर्हि चात्मा नासीत्येवं मन्यामह इत्यत उच्यते। स खेत्यादि। रुत्वं मनः। भूतानिखादीनिपञ्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिषेधः कस्मात् ऐन्द्रियकत्वात्। रूपरसगन्धस्पर्शश-ब्दादीनां वहिरिन्द्रियग्राह्यत्वसाधर्म्येण परस्परवै-धर्म्याभावात्। चैतन्यादेस्तु वहिरिन्द्रियाग्राह्यत्व ग्राह्यत्वाभ्यां रूपादीनां शरीरगुणवैधर्म्यादिति भावः। एवं चैतन्यादेः शरीरगुणत्वे निरस्ते पुनः।

अथात्र नास्तिका आहुः॥ नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। मनसो नित्यत्वान्मन एव सत्त्वसंज्ञकं चैतन्ये कारणम्। चैतन्ये जाते मनसि बुद्धिरुत्पद्यते बुद्धा खल्वभीष्टमिच्छत्यनिष्टं द्वेष्टीति बुद्धा मनसी-च्छाद्वेषौ भवतः। अभीष्टेच्छया चाभीष्टं साधयितुं प्रवर्त्तते अनिष्टद्वेषेणानिष्टं साधयितुं निवर्त्तते इति प्रवृत्ति निवृत्तिरूपः प्रयत्नो मनसि जायते। ततोऽभीष्टेसाधितेऽनिष्टान्निवृत्तौ प्रज्ञापराधादनिष्टेसाधि-तेऽभीष्टानिवृत्तौ सुखमभीष्टेदुःखं मनसि भवतीत्या-त्मप्रत्ययहेतूनां चैतन्यबुद्वीच्छाद्वेषप्रयत्नसुखदुःखानां मनसि सम्भवादेवं योऽहं घटमद्राक्षं सोऽहमेव स्पृ-शामीत्येवं दर्शनस्पर्शनाभ्यामेकस्यैव मनसोऽर्थग्रह-णादिसम्भवान्नात्मन एते चैतन्यादयः प्रत्ययहेतव स्तस्मात्मा। नास्तीत्याहुर्नास्तिकाः।

तत्र समाधत्ते। ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेद-मात्रम्। अस्यार्थः। युष्माकं मते मनसो ज्ञातु र्ज्ञान-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र केचिदाचार्य्या ब्रुवते । द्रव्यं प्रधानम् । कस्मात् व्यवस्थितत्वात् । विशेषेणावस्था। इह खलु द्रव्यं व्यवस्थितं न रसादयो यथामे फले ये रसादयस्ते पक्के तु न सन्ति। ननु चेत् व्यवस्थितत्वं स्वरूपेणावस्थानं तच्च कषायादिकल्पितत्वदशायां नास्तीति व्यभिचार इति चेत्तदा द्रव्यं प्रधानं नित्यत्वात्। नित्यं हि द्रव्यमनित्या गुणाः यथा कल्कादि प्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति । ननु नित्यत्वमविनाशित्वं स्वरूपानुच्छेदो वा तथात्वन्तु न कल्कादित्वदशायामिति व्यभिचर्य्यते हेतुरिति चेन्न द्रव्यं प्रधानं स्वाजात्यावस्थानात् । यथाहि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणीति अतः स्वारम्भकद्रव्यजातीयत्वेनानुवृत्तत्वं स्वारम्भकद्रव्यजातीयत्वानपायत्वं वा स्वभावसंसिद्धलक्षणं वा स्वाजात्यावस्थानमिति। ननु मधुराम्ललवणादीनामपि रसानां पाञ्चभौतिकत्वेन मधुरत्वादिमाग्रहात् पृथिव्यम्ब्वादिगुणवाञ्छल्यग्रहेण पञ्चेन्द्रियग्रहणमुपचर्य्यते इति चेन्न द्रव्यं हि प्रधानमाश्रयत्वात्। द्रव्यमाश्रिताहि रसादय इति।

ननु रसादीना माश्रयत्वेऽपि द्रव्यस्य रसादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सुवर्णं समलाः पञ्च लोहाः ससिकताः सुधा।**
**मनःशिलालेमणयो लवणं गैरिकाञ्जने ॥**
**भौममौषधमुद्दिष्टमौद्भिदन्तु चतुर्विधम् ।**
**वनस्पति स्तथावीरुद्वानस्पत्य स्तथौषधि ॥:**

द्भिदानां वक्रप्रपञ्चत्वेन प्रयोगात् स्वल्पप्रयोगाच्च पार्थिवाणां जाङ्गमानन्तरं वक्तुमारम्भः ।

सुवर्णमित्यादि भौममौषधमुद्दिष्टमित्यन्तेन सपादेनैकश्लोकेन । त्रिंशतिर्भौममौषधमुद्दिष्टम् । सुवर्णं स्वर्णं पञ्चलोहाश्चेति षट् समला स्तेषां मलरूपाणि षट् शिलाजतूनि चत्वारि सौवर्णराजतताम्रायसानि शिराटिका लोहमलं मण्डूरश्चेति । पञ्च० लौहा रजतताम्रत्रपुशीशकाललोहाः ससिकताः सिकता शर्करा खर्परादिभिः सहिताः सुधा दारुमूष गोदन्तादयः पार्थिवविषरूपाः । मनःशिला स्वनामख्यातः आलं हरितालं सपत्रं निष्पत्रञ्चेति द्विविधं मणय चन्द्रकान्तादिमणिमुक्ताप्रवालमुक्तास्फोटहीरकवैक्रादयः । लवणं सैन्धवादिकं गैरिकं स्वर्णगैरिकखटिकादिका गिरिमृत्तिका । अञ्जनं सौवीराञ्जनरसाञ्जन कासीसादिकम् । औद्भिदमौषधमाह ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



औद्भिदन्वित्यादिपादत्रयेन । वनस्पतिरिति वनानां पतिरिति समासेन पुष्पं विना फलवति उद्भिद्वाच्ये सकारागमाद्रूपसिद्धिः। पृषोदरादित्वात्। वीरुदिति विशेषेण लताप्रताने विस्तृतीभूय वा रुणद्धि देशमिति वीरुद्। वानस्पत्य इति पुष्पफलाभ्यां प्रधानं वनस्पति वृक्षो वानस्पत्यः। ओषधिरिति उषदाहे ओषणे भूताग्निना आफलपाकादाधीयते इति ओषधिः फलपाकान्ता। यद्यपि औषधशब्देन जाङ्गमादित्रिविधमेव द्रव्यमुच्यते तथापि तदेकदेशेनोद्भिदेकदेशफलपाकान्तोद्भिदपुच्यते यथा तृणशब्दस्तृणजातौ तृणविशेषे च वर्त्तते। सुश्रुतेनाप्युक्तं प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च। स तु षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः। द्रव्याणि पुनरोषधयस्ता द्विविधा स्थावरा जङ्गमाश्च तासां स्थावराश्चतुर्विधा वनस्पतयो वृक्षा वीरुध ओषधय इति। तेष्वपुष्पाः फलवन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः। प्रतानवत्यस्तम्बिन्यश्च वीरुधः। फलपाकनिष्ठा ओषधय इति। जङ्गमाश्चापि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिजाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्प सरीसृपप्रभृतयो ऽण्डजाः। क्रिमिकीट-

For Private And Personal Use Only

अभ्यञ्जने भोजनार्थे शिरसश्च विरेचने ॥
शस्त्रकर्मणि वर्त्त्यर्थे मञ्जनोत्सादनेषु च ।
अजीर्णानाहयो वति गुल्मे शूले तथोदरे ॥
उक्तानि लवणान्यूर्द्धं मूत्राण्यष्टौ निबोध मे ।
मुख्यानि यानि दृष्टानि सर्वाण्यात्रेयशासने ॥

वातादिहरणकर्म्मार्थं प्रयोगविधिमाह आलेपनार्थे इत्यादि । स्नेहस्वेदविधौ स्नेहकर्म्मणि स्वेदकर्म्मणि च । अधोभागोर्द्धभागेषु विरेचने वमने च निरूहेष्वास्थापनेषु अनुवासने स्नेहवस्तिकर्म्मणि । अभ्यञ्जने सर्व्वाङ्गं वाध्य स्नेहादिम्रक्षणक्रियायां भोजनार्थे भोज्यद्रव्यसंस्कारार्थं शिरसश्च विरेचने नस्यकर्म्मविशेषे । शस्त्रकर्म्मणि वर्त्त्यर्थं आनाहादौ फलवर्त्त्यर्थम् । अञ्जनेषु नेत्राञ्जनयोगेषु उत्सादनेषु उद्वर्त्तनेषु च । अजीर्णे चतुर्विधे आनाहे विड्विबन्धव्याधौ वाते वातव्याधौ गुल्मे शूले तथोदरे । युज्यन्ते पञ्चलवणानि इत्यन्वयः । स्वस्वप्रभावात् । उपसंहरति उक्तानीत्यादि ।

क्रमिकत्वान्मूत्राण्यष्टावाह ऊर्द्धमित्यादि । बहूनि मूत्राणि सन्ति तेषु मुख्यानि यान्यष्टौ मूत्राणि ता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतीहोक्तानि मूत्राणि यथासामर्थ्ययोगतः।
अथ चीराणि वच्यन्ते कर्मचैषां गुणाश्च ये॥
अविचीरमजाचीरं गोचीरं माहिषञ्चयत्।
उष्ट्रीणामथनागीनां वडवायाःस्त्रियास्तथा॥

यथासामर्थ्ययोगतः यथाज्ञानबलेनेत्यर्थः एतेनो-पदेष्टुरेषां गुणान्तराज्ञानं नोन्नेयम्। उक्तेनैव शिष्याणां प्रयोक्तुं सामर्थ्ययोगात्। क्रमिकत्वात् चीराण्याह।

अथ चीराणीत्यादि। चीराणीति नामतः। एषां कर्म्म च गुणाश्च ये ते वच्यन्ते।

अविचीरमित्यादि। नागीनामिति हस्तिनीनां वड़वाया इति अश्वयाः स्त्रिया इति मानुष्याः। प्रकरणात् चीरमिति शेषः। न तु अवीचीरमि-त्युत्तरपदेन सहान्वयो वृत्तिशब्दैकदेशेनान्वयाव्यु-त्पन्नत्वात्। नामतः चीराण्युक्ता गुणकर्म्माणी आह।

प्रायश इत्यादि। सामान्येन चीरगुणकर्म्माणी बोध्ये। यथाक्रमं चीरगुणमित्यनेन पृथक् पृथक् चीराणां गुणकर्म्माणी वच्यमाणे इति वच्यमाण-त्वात्। प्रायश इत्यनेन न स्त्रीचीरादौ सलवण-



For Private And Personal Use Only

